Originalveröffentlichung in: Indian Antiquary. 3 (1874), S. 285-287



# THE CONCLUDING VERSES OF THE SECOND OR VÂKYA-KÂṆḌA OF BHARTṚIHARI'S VÂKYAPADÎYA.

BY Dr. F. KIELHORN, DECCAN COLLEGE.

It was, I believe, the late Professor Goldstücker* who first drew attention to certain verses of Bhartṛihari's Vâkyapadîya which are of considerable interest for the history of Sanskrit Grammar. As the London MS. made use of by him is unfortunately very incorrect, Professor Goldstücker was obliged in many cases to have recourse to conjectural readings, and it is therefore hardly strange that his translation of the passage in question should have been open to objections. By comparing the Berlin MS. of the Vâkyapadîya, Professor Weber† was enabled to publish a more correct and reliable text of the same verses; in proposing, however, a translation of the latter, he, like his predecessor, laboured under the disadvantage of being destitute of the assistance of any native commentary. Two Sanskrit commentaries appear to have been accessible to Târânâtha Tarkavachaspati,‡ but in republishing the passage published by Professors Goldstücker and Weber he omitted some of Bhartṛihari's verses, and mixed up the remainder with other verses that do not belong to Bhartṛihari himself, but were composed by his commentator Puṇyarâja, and occur in the *résumé* which that scholar has given of the contents of the second kâṇḍa of Bhartṛihari's work.

As I have at last succeeded in procuring considerable portions of both Puṇyarâja's and Helârâja's commentaries, I propose to republish below the last ten verses of the second or Vâkya-kâṇḍa of the Vâkyapadîya, together with Puṇyarâja's gloss. The latter appears to me generally so clear and intelligible as to render an English translation for Sanskrit scholars unnecessary.

I have no means of ascertaining whether Puṇyarâja and Helârâja have either of them composed separate commentaries on the whole of the Vâkyapadîya: my fragments of Puṇyarâja's work refer only to the second kâṇḍa; those of Helârâja's commentary only to the third or Pada-kâṇḍa, of the Vâkyapadîya. Nor have I, up to the present time, been able to learn anything regarding Puṇyarâja beyond his name and the fact that he commented on Bhartṛihari's work. Helârâja was a son of Bhûtirâja, and a descendant of Lakshmaṇa minister of the king Muktâpîḍa§ of Kâshmîr; this is clear from

* See his *Pâṇini*, p. 237.

† See *Indische Studien*, vol. V. p. 159, and also Professor Stenzler's notes, *ib.* p. 447.

‡ See *Siddhânta-Kaumudî*, vol. II. p. 2 of the Introduction.

§ Also called Lalitâditya: see *Râjataranginî*, IV. 42, 43.

the following verse which occurs towards the end of my MS. of his work :—

मुक्तापीड इति प्रसिद्धिमगमत्काश्मीरदेशे नृपः
श्रीमान्ख्यातयशा बभूव नृपतेस्तस्य प्रभावानुगः ।
मन्त्री लक्ष्मण इत्युदारचरितस्तस्यान्ववाये भवो *
हेलाराज इमं प्रकाशमकरोच्छ्रीभूतिराजात्मजः ॥

———

Punyarâja writes as follows :—

अथ महाभाष्यस्यावतारान्वाख्यानपूर्वकं टीकाकारो महत्तामुपवर्णयन्स्वरचितस्य ग्रन्थस्य गुरुपूर्वकममभिधानमाह ।

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान् ।
संप्राप्य वैयाकरणान्संग्रहे ऽस्तमुपागते ॥ १ ॥

इह पुरा पाणिनीये ऽस्मिन्व्याकरणे व्याड्युपरचितं लक्षपरिमाणग्रन्थं संग्रहाभिधानं निबन्धनमासीत् । तच्च कालवशात्सुकुमारबुद्धीन्वैयाकरणान्प्राप्यास्तमुपागतम् । तस्मात्क्लेशभीरुत्वात्संक्षेपरुचयस्ते जनाः । अत एवाल्पो विद्यासु परिग्रहः स्वीकारो येषां ते तथा । ततस्तैः संग्रहाध्ययनमुपेक्षितमित्यस्तंयातः संग्रहः ॥

साधुत्वज्ञानोपायिकतया धर्मसाधनत्वेनोपजातोपयोगाया व्याकरणस्मृतेरविच्छेदाय करुणाप्रयुक्तेनाथ भगवता पतञ्जलिना वार्त्तिकव्याख्यानपुरःसरं महाभाष्यनिबन्धनमुपरचितमित्यभिधानमाह ।

कृते ऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥२॥

गुरुणेति भाष्यकर्तुः पूजापदम् । तीर्थान्यागमविशेषास्तान्पश्यति विजानातीति तीर्थदर्शी । अनेन गुरुत्वनिबन्धनः प्रभावातिशयो भगवत उक्तः । तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमिति । अत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्यं महाभाष्यमित्युच्यते लोके ॥

अथ महत्त्वमेव विशेषणद्वारेणास्योपपादयितुमाह ।

अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात् ।

गाधो निष्ठापरिच्छेद इयत्तेति यावत् । असावलब्धो यस्य । कस्मादित्याह । गाम्भीर्यादिति । गाम्भीर्यं गहनता प्रमेयबाहुल्येन दुरवगाहत्वम् । अतिगम्भीरं हि भाष्यमुपरचितं भगवता पतञ्जलिनेति । न तस्याभिधेयं व्यवच्छेत्तुं केनचिच्छक्यत इति । किमेवमेकान्तगहनमिदं भाष्यम् । नेत्याह । उत्तान इवेत्यादि । उत्तानं स्पष्टम् । सौष्ठवं परिपाटी । यस्मादेतद्भाष्यं परिपाटीलक्षणादत्र सौष्ठवादुत्तानं स्पष्टप्रायं यत एवं प्रतिभात्यतो नेदमसेव्यम् । सज्जनमानसमिव निसर्गसुकुमारमतिगम्भीरं चैतदत एव महाभाष्यमित्युच्यत इत्यर्थः । एतेन संग्रहानुसारेण भगवता पतञ्जलिना संग्रहसंक्षेपभूतमेव प्रायशो भाष्यमुपनिबद्धमिदमित्युक्तं वेदितव्यम् । तदेवं ब्रह्मकाण्डे कायवाग्बुद्धिविषया ये ऽमला इत्यादिश्लोकेन भाष्यकारप्रशंसोक्तेह चैवं भाष्यप्रशंसेति शास्त्रस्य शास्त्रकर्तुश्च टीकाकृता महत्तोपवर्णिता ॥

अत एवेदं महाभाष्यमकृतबुद्धयो नैव बोद्धुमलमित्याह ।

तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः ॥ ३ ॥

कृता व्युत्पत्त्या प्रकर्षं प्राप्ता मतिर्बुद्धिर्येषां ते तथा तद्रूपवैकल्येनाकृतबुद्धयः स्वल्पप्रज्ञा उच्यन्ते । तेषां निश्चयो निर्णयपर्यन्तो बोधो नैवावास्थित । न प्रतिष्ठामलभत । न तेनास्मद्गुरोस्तत्रभवतो वसुरातादन्यः कश्चिदिमं भाष्यार्णवमवगाहितुमलमित्युक्तं भवति ॥

तथा च संग्रहप्रतिपक्षभूतैराचार्यैस्तर्कविद्यामात्रवेदिभिर्बुद्धिपाटवादिदमाप्लावितमाभासीकृतमित्याह ।

वैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः ।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके ॥ ४ ॥

शुष्कतर्को ऽन्यशास्त्रपरिमलरहितः केवल एव भण्यते । तमेवानुसरन्ति प्रमेयनिर्णयायेति तदनुसारिणः । महाभाष्यं हि बहुविधविद्यावादबहलमार्षं व्यवस्थितं ततश्चान्वीक्षिकीमात्रकुशलः कथं तन्निश्चिनुयादिति तर्कमात्रानुसारिभिस्तैस्तद्विप्लावितम् । तर्कश्च पुरुषाणां स्वबुद्धिमात्रनिर्मितविग्रहो ऽव्यवस्थित एव । यदुक्तं

यत्नेनानुमितो ऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यत इति ॥

इत्थं च परस्परं वैमत्यादागमसंत्यागाच्च यथावस्थितो व्याकरणागमः पातञ्जलिशिष्येभ्यः कालपरिवासाद्भ्रष्टः सन्ग्रन्थमात्रे पाठमात्र एव व्यवस्थितो दाक्षिणात्येष्वित्याह ।

यः पातञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥ ५ ॥

तदेवमुत्सन्नकल्पः संजातो व्याकरणागमः ॥

अथ कालान्तरेण चन्द्राचार्यादिभिरागमं लब्ध्वा तेन चोपायभूतेन सकलानि भाष्यव्यवस्थितानि न्यायबीजानि तान्यनुसृत्य व्याकरणागमः पुनरपि स्फीततां नीत इत्यभिधानुमाह ।

पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः ॥६॥

पर्वतात् त्रिकूटैकदेशवर्तिनो त्रिकूटकदेशादिति । तत्र ह्युपलतले रावणविरचितो मूलभूतव्याकरणागमस्तिष्ठति केनचिच्च ब्रह्मरक्षसानीय चन्द्राचार्यवसुरातगुरुप्रभृतीनां दत्त इति तैः खलु [2] यथावद्व्याकरणस्य स्वरूपं तत उपलभ्य संततं च शिष्याणां व्याख्याय बहुशाखत्वं नीतो विस्तारं प्रापित इत्यनुश्रूयते ॥

अथ कदाचिद्योगतो विचार्य तत्रभवता वसुरातगुरुणा ममायमागमः संज्ञाय वात्सल्यात्प्रणीत इति स्मरन्नितरच्चास्य ग्रन्थस्य गुरुपूर्वकममभिधानमाह ।

न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनम् ।
प्रणीतो गुरुणास्माकमयमागमसंग्रहः ॥ ७ ॥

न्यायस्य प्रतिष्ठा प्रस्थानं तस्य मार्गान् न्यायप्रस्थानमार्गान् । न्यायप्रतिष्ठितैर्बहुभिर्मार्गैरिति यावत् । न्यायप्रस्थानमार्गांस्तानन्वं च दर्शनं व्याकरणसिद्धान्तलक्षणमभ्यस्यायं प्रणीतः । अनेन गुरुणा संज्ञाय न तथा ममायमागमसंग्रहः प्रणीतो येन संदेहो

* MS. भुवां.

भवेदपि तु सावधानेनेत्युक्तं भवति । अस्माकमिति बहुवचनादन्येषामपि सहाध्यायिनां ग्रहणसामर्थ्यं बोधितम् । मया तु तदनुच्छेदायायमुपनिबन्धः कृत इत्यात्मनो बहुमानः प्रकटितः ॥

नन्वेतावानेवायं काण्डद्वयप्रोक्तो व्याकरणागम इत्याशङ्क्याह ।

वर्त्मनामत्र केषांचिद्वस्तुमात्रमुदाहृतम् ।

काण्डे तृतीये न्यक्षेण भविष्यति विचारणा ॥ ८ ।

अत्रास्मिन्वाक्यकाण्डे काण्डद्वये वा केषांचिदेव न्यायवर्त्मनां वस्तुमात्रं वीजमात्रं प्रदर्शितमवशिष्टे तु तृतीये ऽस्य ग्रन्थस्य पदकाण्डे काण्डद्वयनिष्यन्दभूते[3] न्यक्षेणादरविशेषेण स्वसिद्धान्तपरसिद्धान्तवर्तिनां विचाराणां युक्तायुक्तविचारपूर्वकं निर्णीतिर्भविष्यति । ततो नायमेतावान्व्याकरणागमसंग्रह इति ॥

ननु तत्तन्न्यायप्रस्थानमार्गाभ्यासेन किं कृत्यं स्वदर्शनमेव सुनिश्चितं किं न विचार्यत इत्याह ।

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः ।

कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥ ९॥

नानाविधैरागमदर्शनैरागमसिद्धान्तैः खलु प्रज्ञा विवेकं लभते वैशारद्यमाप्नोति । ततश्च निःसंदिग्धं स्वसिद्धान्तमेव[4] स्पष्टीकर्तुं भिन्नागमदर्शनैः शक्तिर्जायते । अदृष्टपरकीयागमस्वरूपेण प्रतिपन्ना स्वोत्प्रेक्षामेव तेषु[5] चावस्थानेष्वनुसरता कियच्छक्यमुन्नेतुं प्रतिविधातुम् । कदाचित्परमर्षयो योगजधर्मोत्पन्नसामर्थ्याद्यथावदर्थान्पश्यन्तः[6] सिद्धान्तमभिधातुमलमिति शोभते ये त्वारुरुक्षवः प्राथमकल्पिकाभ्यासमलिनचित्तवृत्तयः शास्त्रादेवातीतानागतव्यवहितपदार्थस्वरूपं निश्चिन्वन्ति तेषां नानागमोपसेवयैवानुप्रसीदति भगवती प्रतिभेति ॥

युक्तमेतदेव निरूपयितुमाह ।

तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।

अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥ १० ।

प्रतिष्ठामुपगतैः पूर्वैरागमैर्बहुविधैर्विनाश्रयमेव तत्तदित्ययथायथमेवोत्प्रेक्षमाणानां विकल्पयतां प्रतिपत्तॄणां शास्त्रोपज्ञमेधाविरहिणां पण्डितंमन्यानामभिमानाग्रहावृतानां तेषां भगवती विद्या विशुद्धप्रज्ञा प्रतिभालक्षणा न प्रसीदत्यत्यर्थम् । किं तर्हि । वृद्धोपसेवाशालिनामागमजुषां विगलिताभिमानानामभिजातानामेवैषां भगवती प्रज्ञा प्रसादमुपयातीति सिद्धम् ॥

१ The London and a Benares MS. which I have both compared read वैजिसौभव०.

२ MS. ते खलु.

३ MS. न्यंक्षेणा०.

४ MS. सपरीकर्तुं.

५ MS. तेषु.

६ MS. पश्यन् सि०.